पूर्ववत् सकलं कुर्यान्मराडपस्नपनादिकं
भद्रपीठे श्रियं न्यस्य स्थापयेदष्ट वै घटान् २
घृतेनाभ्यज्य मूलेन स्नपयेत् पञ्चगव्यकैः
हिरराययवर्णा हरिणी नेत्रे चोन्मीलयेच्छ्रियाः ३
तन्म स्रावह इत्येवं प्रदद्यान्मधुरत्रयम्
स्रश्वपूर्वेति पूर्वेण तां कुम्भेनाभिषेचयेत् ४
कामोऽस्मितेति याम्येन पश्चिमेनाभिषेचयेत्
चन्द्रं प्रभासामुच्चार्यादित्यवर्णेति चोत्तरात् ५
उपैतु मेति चाग्नेयात् चुत्पिपासेति नैर्ऋताात्
गन्धद्वारेति वायव्यां मनसः काममाकृतिम् ६
ईशानकलशेनैव शिरः सौवर्णकर्दमात्
एकाशीतिघटैः स्नानं मन्त्रेणापः सृजन् चितिम् ७
स्राद्रां पुष्करिणीं गन्धैरार्द्रामित्यादिपुष्पकैः
तन्मयावह मन्त्रेण य स्रानन्द ऋचाखिलम् ८
शायन्तीयेन शय्यायां श्रीसूक्तेन च सन्निधिम्
लच्मीवीजेन चिच्छक्तिं विन्यस्याभ्यर्चयेत् पुनः ९
श्रीसूक्तेन मराडपेऽथ कुराडेष्वब्जानि होमयेत्
करवीराणि वा हुत्वा सहस्त्रं शतमेव वा १०

गृहोपकरणान्तादि श्रीसूक्तेनैव चार्पयेत्
ततः प्रासादसंस्कारं सर्वं कृत्वा तु पूर्ववत् ११
मन्त्रेण पिण्डिकां कृत्वा प्रतिष्ठानं ततः श्रियः
श्रीसूक्तेन च सान्निध्यं पूर्ववत् प्रत्यृचं जपेत् १२
चिच्छक्तिं बोधयित्वा तु मालात् सान्निध्यकं चरेत्
भूस्वर्णवस्त्रगोऽन्नादि गुरवे ब्रह्मणेऽर्पयेत्
एवं देव्योऽखिलाः स्थाप्यावाह्य स्वर्गादि भावयेत् १३
इत्यादिमहापुराणे आग्नेये लक्ष्मीस्थापनं नाम द्विषष्टितमोऽध्यायः

अथ त्रिषष्टितमोऽध्यायः

सुदर्शनचक्रादिप्रतिष्ठाकथनम्

भगवानुवाच
एवं तार्क्ष्यस्य चक्रस्य ब्रह्मणो नृहरेस्तथा
प्रतिष्ठा विष्णुवत् कार्या स्वस्वमन्त्रेण तां शृणु १
सुदर्शन महाचक्र शान्त दुष्टभयङ्कर
च्छिन्द छिन्द भिन्द भिन्द विदारय विदारय परमन्त्रान् ग्रस ग्रस
भक्षय भक्षय भूतान् त्रायस त्रायस हूं फट् सुदर्शनाय नमः ।
अभ्यर्च्य चक्रं चानेन रणे दारयते रिपून् २
ॐ क्षौं नरसिंह उग्ररूप ज्वल ज्वल प्रज्वल प्रज्वल स्वाहा
नरसिंहस्य मन्त्रोयं पातालाख्यस्य वच्मि ते

ॐ क्षौं नमो भगवते नरसिंहाय प्रदीप्तसूर्यकोटिसहस्रसमतेजसे
वज्रनखदंष्ट्रायुधाय
स्फुटविकटविकीर्णकेसरसटाप्रक्षुभितमहार्णवाम्भोददुन्दुभिनिर्घोषाय
सर्वमन्त्रोत्तारणाय एह्येहि भगवन्नरसिंह पुरुषपरापरब्रह्मसत्येन स्फुर
स्फुर विजृम्भ विजृम्भ आक्रम गर्ज गर्ज मुञ्च मुञ्च सिंहनादान्
विदारय विदारय विद्रावय विद्रावय आविश
आविश सर्वमन्त्ररूपाणि सर्वमन्त्रजातयश्च हन हन छिन्द छिन्द
सङ्क्षिप सङ्क्षिप सर सर दारय दारय स्फुट स्फुट स्फोटय स्फोटय
ज्वालामालासङ्घातमय सर्वतोऽनन्तज्वालावज्राशनिचक्रेण
सर्वपातालान् उत्सादय उत्सादय सर्वतोऽनतज्वालावज्रशरपञ्जरेण
सर्वपातालान् परिवारय परिवारय सर्वपातालासुरवासिनां
हृदयान्याकर्षय आकर्षय शीघ्रं दह दह पच पच मथ मथ शोषय
शोषय निकृन्तय निकृन्तय तावद्यावन्मे वशमागताः पातालेभ्यः
फट् असुरेभ्यः फट् मन्त्ररूपेभ्यः फट् मन्त्रजातिभ्यः फट् संशयान्मां
भगवन्नरसिंहरूप विष्णो सर्वापद्भ्यः सर्वमन्त्ररूपेभ्यो रक्ष रक्ष हूं फट्
नमोऽस्तु ते
नरसिंहस्य विद्येयं हरिरूपार्थसिद्धिदा ३
त्रिलोक्यमोहनैर्मन्त्रैः स्थाप्यस्त्रैलोक्यमोहनः
गदी दक्षे शान्तिकरो द्विभुजो वा चतुर्भुजः ४
वामोर्ध्वे कारयेच्चक्रं पाञ्चजन्यमथो ह्यधः
श्रीपुष्टिसंयुतं कुर्याद् बलेन सह भद्रया ५

प्रासादे स्थापयेद्विष्णुं गृहे वा मराडपेऽपि वा
वामनं चैव वैकुराठं हयास्यमनिरुद्धकम् ६
स्थापयेज्जलशय्यास्थं मत्स्यादींश्चावतारकान्
सङ्कर्षणं विश्वरूपं लिङ्गं वै रुद्रमूर्तिकम् ७
अर्धनारीश्वरं तद्वद्धरिशङ्करमातृकाः
भैरवं च तथा सूर्यं ग्रहांस्तद्वद्विनायकम् ८
गौरीमिन्द्रादिकां लेप्यां चित्रजां च बलाबलाम्
पुस्तकानां प्रतिष्ठां च वक्ष्ये लिखनतद्विधिम् ९
स्वस्तिके मराडलेऽभ्यर्च्य शरपत्रासने स्थितम्
लेख्यञ्च लिखितं पुस्तं गुरुर्विद्यां हरिं यजेत् १०
यजमानो गुरुं विद्यां हरिं लिपिकृतं नरम्
प्राङ्मुखः पद्मिनीं ध्यायेत् लिखित्वा श्लोकपञ्चकम् ११
रौप्यस्थमस्या हैम्या च लेखन्या नागराक्षरम्
ब्राह्मणान् भोजयेच्छक्त्या शक्त्या दद्याच्च दक्षिणाम् १२
गुरुं विद्यां हरिं प्राच्र्य पुराणादि लिखेन्नरः
पूर्ववन्मराडलाद्ये च ऐशान्यां भद्रपीठके १३
दर्पणे पुस्तकं दृष्ट्वा सेचयेत् पूर्ववद् घटैः
नेत्रोन्मीलनकं कृत्वा शय्यायां तु न्यसेन्नरः १४

न्यसेत्तु पौरुषं सूक्तं देवाद्यं तत्र पुस्तके
कृत्वा सजीवीकरणं प्राच्र्य हुत्वा चरुं ततः १५
सम्प्राश्य दक्षिणाभिस्तु गुर्वादीन् भोजयेद्द्विजान्
रथेन हस्तिना वापि भ्रामयेत् पुस्तकं नरैः १६
गृहे देवालयादौ तु पुस्तकं स्थाप्य पूजयेत्
वस्त्रादिवेष्टितं पाठादादावन्ते समर्चयेत् १७
जगच्छान्तिश्चावधार्य पुस्तकं वाचयेन्नरः
अध्यायमेकं कुम्भाद्भिर्यजमानादि सेचयेत् १८
द्विजाथ पुस्तकं दत्त्वा फलस्यान्तो न विद्यते
त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती १९
विद्यादानफलं दत्त्वा मस्यन्तं पत्रसञ्चयम्
यावत्तु पत्रसङ्ख्यानमक्षराणां तथानघ २०
तावद्वर्षसहस्राणि विष्णुलोके महीयते
पञ्चरात्रं पुराणानि भारतानि ददन्नरः
कुलैकविंशमुद्धृत्य परे तत्त्वे तु लीयते २१

इत्यादिमहापुराणे आग्नेये देवादिप्रतिष्ठापुस्तकप्रतिष्ठाकथनं नाम त्रिषष्टितमोऽध्यायः

अथ चतुःषष्टितमोऽध्यायः
कूपादिप्रतिष्ठाकथनम्
भगवानुवाच
कूपवापीतडागानां प्रतिष्ठां वच्मि तां शृणु
जलरूपेण हि हरिः सोमो वरुण उत्तम १
अग्नीषोममयं विश्वं विष्णुरापस्तु कारणम्
हैमं रौप्यं रत्नजं वा वरुणं कारयेन्नरः २
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम्
वामेन नागपाशं तं नदीनागादिसंयुतम् ३
यागमण्डपमध्ये स्याद्वेदिका कुण्डमण्डिता
तोरणं वारुणं कुम्भं न्यसेच्च करकान्वितम् ४
भद्रके चार्धचन्द्रे वा स्वस्तिके द्वारि कुम्भकान्
अग्न्याधानं चाप्यकुण्डे कृत्वा पूर्णां प्रदापयेत् ५
वरुणं स्नानपीठे तु ये ते शतेति संस्पृशेत्
घृतेनाभ्यञ्जयेत् पश्चान्मूलमन्त्रेण देशिकः ६
शन्नो देवीति प्रक्षाल्य शुद्धवत्या शिवोदकैः

अधिवासयेदष्टकुम्भान् सामुद्रं पूर्वकुम्भके ७
गाङ्गमग्नौ वर्षतोयं दक्षे रक्षस्तु नैर्भरम्
नदीतोयं पश्चिमे तु वायव्ये तु नदोदकम् ८
औद्भिज्जं चोत्तरे स्थाप्य ऐशान्यां तीर्थसम्भवम्
अलाभे तु नदीतोयं यासां राजेति मन्त्रयेत् ९
देवं निर्माज्य॑ निर्मञ्छ्य दुर्मित्रियेति विचक्षणः
नेत्रे चोन्मीलयेच्चित्रं तच्चक्षुर्मधुरत्रयैः १०
ज्योतिः सम्पूरयेद्धैम्यां गुरवे गामथार्पयेत्
समुद्रज्येष्ठेत्यभिषिञ्चेद्वरुणं पूर्वकुम्भतः ११
समुद्रं गच्छ गाङ्गेयात् सोमो धेन्विति वर्षकात्
देवीरापो निर्भराद्भिर्नदाद्भिः पञ्चनद्यतः १२
उद्भिदद्भ्यश्चोद्भिदेन पावमान्याथ तीर्थकैः
आपो हि ष्ठा पञ्चगव्याद्भिररायवर्णेति स्वर्णजात् १३
आपो अस्मेति वर्षोष्णचैर्व्याहृत्या कूपसम्भवैः
वरुणञ्च तडागोष्णचैर्वरुणाद्भिस्तु वश्यतः १४
आपो देवीति गिरिजैरेकाशीतिघटैस्ततः
स्नापयेद्वरुणस्येति त्वन्नो वरुण चार्घ्यकम् १५

व्याहृत्या मधुपर्कन्तु वृहस्पतेति वस्त्रकम्
वरुणेति पवित्रन्तु प्रणवेनोत्तरीयकम् १६
यद्वारण्येन पुष्पादि प्रदद्याद्वरुणाय तु
चामरं दर्पणं छत्रं व्यजनं वैजयन्तिकाम् १७
मूलेनोत्तिष्ठेत्युत्थाप्य तां रात्रिमधिवासयेत्
वरुणञ्चेति सान्निध्यं यद्वारण्येन पूजयेत् १८
सजीवीकरणं मूलात् पुनर्गन्धादिना यजेत्
मण्डपे पूर्ववत् प्राच्र्य कुण्डेषु समिदादिकम् १९
वेदादिमन्त्रैर्गन्धाद्याश्चतस्त्रो धेनवो दुहेत्
दिक्ष्वथो वै यवचरुं ततः संस्थाप्य होमयेत् २०
व्याहृत्या वाथ गायत्र्या मूलेनामन्त्रयेत्तथा
सूर्याय प्रजापतये द्यौः स्वाहा चान्तरिक्षकः २१
तस्यै पृथिव्यै देहधृत्यै इह स्वधृतये ततः
इह रत्यै चेह रमत्या उग्रो भीमश्च रौद्रकः २२
विष्णुश्च वरुणो धाता रायस्पोषो महेन्द्रकः
अग्निर्यमो नैर्ऋतोऽथ वरुणो वायुरेव च २३
कुवेर ईशोऽनन्तोऽथ ब्रह्मा राजा जलेश्वरः
तस्मै स्वाहेदं विष्णुश्च तद्विप्रासेति होमयेत् २४

सोमो धेन्विति षड् हुत्वा इमं मेति च होमयेत्
आपो हि ष्ठेति तिसृभिरिमा रुद्रेति होमयेत् २५
दशदिक्षु बलिं दद्यात् गन्धपुष्पादिनार्चयेत्
प्रतिमां तु समुत्थाप्य मण्डले विन्यसेद् बुधः २६
पूजयेद्गन्धपुष्पाद्यैर्हैमपुष्पादिभिः क्रमात्
जलाशयांस्तु दिग्भागे वितस्तिद्वयसम्मितान् २७
कृत्वाष्टौ स्थण्डिलान् रम्यान् सैकतान् देशिकोत्तमः
वरुणस्येति मन्त्रेण साज्यमष्टशतं ततः २८
चरुं यवमयं हुत्वा शान्तितोयं समाचरेत्
सेचयेन्मूर्ध्नि देवं तु सजीवकरणं चरेत् २९
ध्यायेत्तु वरुणं युक्तं गौर्या नदनदीगणैः
ॐ वरुणाय नमोऽभ्यर्च्य ततः सान्निध्यमाचरेत् ३०
उत्थाप्य नागपृष्ठाद्यैर्भ्रामयेत्तैः समङ्गलैः
आपो हि ष्ठेति च क्षिपेत्त्रिमध्वाक्ते घटे जले ३१
जलाशये मध्यगतं सुगुप्तं विनिवेशयेत्
स्नात्वा ध्यायेच्च वरुणं सृष्टिं ब्रह्माण्डसञ्ज्ञिकाम् ३२
अग्निबीजेन सन्दग्ध्य तद्भस्म प्लावयेद्धराम्
सर्वमपोमयं लोकं ध्यायेत् तत्र जलेश्वरम् ३३

तोयमध्यस्थितं देवं ततो यूपं निवेशयेत्
चतुरस्त्रमथाष्टास्त्रं वर्तुलं वा प्रवर्तितम् ३४
आराध्य देवतालिङ्गं दशहस्तं तु कूपके
यूपं यज्ञीयवृक्षोत्थं मूले हैमं फलं न्यसेत् ३५
वाप्यां पञ्चदशकरं पुष्करिण्यां तु विंशकम्
तडागे पञ्चविंशाख्यं जलमध्ये निवेशयेत् ३६
यागमण्डपाङ्गेण वा यूपव्रस्केति मन्त्रतः
स्थाप्य तद्वेष्टयेद्वस्त्रैर्यूपोपरि पताकिकाम् ३७
तदभ्यर्च्य च गन्धाद्यैर्जगच्छान्तिं समाचरेत्
दक्षिणां गुरवे दद्याद्भूगोहेमाम्बुपात्रकम् ३८
द्विजेभ्यो दक्षिणा देया आगतान् भोजयेत्तथा
आब्रह्मस्तम्भपर्यन्ता ये केचित्सलिलार्थिनः ३९
ते तृप्तिमुपगच्छन्तु तडागस्थेन वारिणा
तोयमुत्सर्जयेदेवं पञ्चगव्यं विनिक्षिपेत् ४०
आपो हि ष्ठेति तिसृभिः शान्तितोयं द्विजैः कृतम्
तीर्थतोयं क्षिपेत् पुण्यं गोकुलञ्चार्पयेद्द्विजान् ४१

अनिवारितमन्नाद्यं सर्वजन्यञ्च कारयेत्
अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ४२
एकाहं स्थापयेत्तोयं तत्पुण्यमयुतायुतम्
विमाने मोदते स्वर्गे नरकं न स गच्छति ४३
गवादि पिवते यस्मात्तस्मात् कर्तुर्न पातकम्
तोयदानात्सर्वदानफलं प्राप्य दिवं व्रजेत् ४४
इत्यादिमहापुराणे आग्नेये कूपवापीतडागादिप्रतिष्ठाकथनं नाम चतुःषष्टितमोऽध्यायः

अथ पञ्चषष्टितमोऽध्यायः

सभास्थापनकथनम्

भगवानुवाच
सभादिस्थानं वक्ष्ये तथैतेषां प्रवर्तनम्
भूमौ परीक्षितायाञ्च वास्तुयागं समाचरेत् १
स्वेच्छया तु सभां कृत्वा स्वेच्छया स्थापयेत् सुरान्
चतुष्पथे ग्रामादौ च न शून्ये कारयेत् सभाम् २
निर्मलः कुलमुद्धृत्य कर्ता स्वर्गे विमोदते
अनेन विधिना कुर्यात् सप्तभौमं हरेर्गृहम् ३

यथा राज्ञां तथान्येषां पूर्वाद्याश्च ध्वजादयः
कोणभुजान् वर्जयित्वा चतुःशालं तु वर्तयेत् ४
त्रिशालं वा द्विशालं वा एकशालमथापि वा
व्ययाधिकं न कुर्वीत व्ययदोषकरं हि तत् ५
आयाधिके भवेत् पीडा तस्मात् कुर्यात् समं द्वयम्
करराशिं समस्तन्तु कुर्याद्वसुगुणं गुरुः ६
सप्तार्चिषा हृते भागे गर्गविद्याविचक्षणः
अष्टधा भाजिते तस्मिन् यच्छेषं स व्ययो गतः ७
अथवा करराशिं तु हन्यात् सप्तार्चिषा बुधः
वसुभिः संहृते भागे पृथ्व्यादि परिकल्पयेत् ८
ध्वजो धूम्रस्तथा सिंहः श्वा वृषस्तु खरो गजः
तथा ध्वाङ्क्षस्तु पूर्वादावुद्भवन्ति विकल्पयेत् ९
त्रिशालकत्रयं शस्तं उदक्पूर्वविवर्जितम्
याम्यां परगृहोपेतं द्विशालं लभ्यते सदा १०
याम्ये शालैकशालं तु प्रत्यक्शालमथापि वा
एकशालद्वयं शस्तं शेषास्त्वन्ये भयावहाः ११
चतुःशालं सदा शस्तं सर्वदोषविवर्जितम्

एकभौमादि कुर्वीत भवनं सप्तभौमकम् १२
द्वारवेद्यादिरहितं पूरणेन विवर्जितम्
देवगृहं देवतायाः प्रतिष्ठाविधिना सदा १३
संस्थाप्य मनुजानाञ्च समुदायोक्तकर्मणा
प्रातः सर्वौषधीस्नानं कृत्वा शुचिरतन्द्रितः १४
मधुरैस्तु द्विजान् भोज्य पूर्णकुम्भादिशोभितम्
सतोरणं स्वस्ति वाच्य द्विजान् गोपृष्ठहस्तकः १५
गृही गृहं प्रविशेच्च दैवज्ञान् प्राच्र्य संविशेत्
गृहे पुष्टिकरं मन्त्रं पठेच्चेमं समाहितः १६
ॐ नन्दे नन्दाय वाशिष्ठे वसुभिः प्रजया सह
जये भार्गवदायादे प्रजानां विजयावहे १७
पूर्णेऽङ्गिरसदायादे पूर्णकामं कुरुष्व माम्
भद्रे काश्यपदायादे कुरु भद्रां मतिं मम १८
सर्ववीजौषधीयुक्ते सर्वरत्नौषधीवृते
रुचिरे नन्दने नन्दे वासिष्ठे रम्यतामिह १९
प्रजापतिसुते देवि चतुरस्रे महीयसि
सुभगे सुव्रते देवि गृहे काश्यपि रम्यताम् २०

पूजिते परमाचार्यैर्गन्धमाल्यैरलङ्कृते
भवभूतिकरे देवि गृहे भार्गवि रम्यताम् २१
अव्यक्ते व्याकृते पूर्णे मुनेरङ्गिरसः सुते
इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहम् २२
देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे
मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव २३
इत्यादिमहापुराणे आग्नेये सभागृहस्थापनं नाम पञ्चषष्टितमोऽध्यायः

अथ षट्षष्टितमोऽध्यायः

साधारणप्रतिष्ठाविधानम्

भगवानुवाच

समुदायप्रतिष्ठाञ्च वक्ष्ये सा वासुदेववत्
आदित्या वसवो रुद्राः साध्या विश्वेऽश्विनौ तथा १
ऋषयश्च तथा सर्वे वक्ष्ये तेषां विशेषकम्
यस्य देवस्य यन्नाम तस्याद्यं गृह्य चाक्षरम् २
मात्राभिर्भेदयित्वा तु दीर्घाण्यङ्गानि भेदयेत्
प्रथमं कल्पयेद्बीजं सविन्दुं प्रणवं नतिम् ३
सर्वेषां मूलमन्त्रेण पूजनं स्थापनं तथा
नियमव्रतकृच्छ्राणां मठसङ्क्रमवेश्मनाम् ४
मासोपवासं द्वादश्यामित्यादिस्थापनं वदे

शिलां पूर्णघटं कांस्यं सम्भारं स्थापयेत्ततः ५
ब्रह्मकूर्चं समाहृत्य श्रपेद् यवमयं चरुम्
क्षीरेण कपिलायास्तु तद्विष्णोरिति साधकः ६
प्रणवेनाभिधार्यैव दर्व्या सङ्घट्टयेत्ततः
साधयित्वावतार्याथ विष्णुमभ्यर्च्य होमयेत् ७
व्याहृता चैव गायत्र्या तद्विप्रासेति होमयेत्
विश्वतश्चक्षुर्वेदाद्यैर्भूरग्नये तथैव च ८
सूर्याय प्रजापतये अन्तरिक्षाय होमयेत्
द्यौः स्वाहा ब्रह्मणे स्वाहा पृथिवी महाराजकः ९
तस्मै सोमञ्च राजानमिन्द्राद्यैर्होममाचरेत्
एवं हुत्वा चरोर्भागान् दद्याद्दिग्बलिमादरात् १०
समिधोऽष्टशतं हुत्वा पालाशांश्चाज्यहोमकम्
कुर्यात् पुरुषसूक्तेन इरावती तिलाष्टकम् ११
हुत्वा तु ब्रह्मविष्ण्वीशदेवानामनुयायिनाम्
ग्रहाणामाहुतीर्हुत्वा लोकेशानामथो पुनः १२
पर्वतानां नदीनाञ्च समुद्राणां तथाहुतीः
हुत्वा च व्याहृतीर्दद्यात् स्त्रुवपूर्णाहुतित्रयम् १३

वौषडन्तेन मन्त्रेण वैष्णवेन पितामह
पञ्चगव्यं चरुं प्राश्य दत्वाचार्याय दक्षिणाम् १४
तिलपात्रं हेमयुक्तं सवस्त्रं गामलङ्कृताम्
प्रीयतां भगवान् विष्णुरित्युत्सृजेद् व्रतं बुधः १५
मासोपवासादेरन्यां प्रतिष्ठां वच्मि पूर्णतः
यज्ञेनातोष्य देवेशं श्रपयेद्वैष्णवं चरुम् १६
तिलतण्डुलनीवारैः श्यामाकैरथवा यवैः
आज्येनाधार्य चोत्तार्य होमयेन्मूर्तिमन्त्रकैः १७
विष्णवादीनां मासपानां तदन्ते होमयेत् पुनः
ॐ विष्णवे स्वाहा । ॐ विष्णवे निभूयपाय स्वाहा । ॐ विष्णवे शिपिविष्टाय स्वाहा । ॐ नरसिंहाय स्वाहा । ॐ पुरुषोत्तमाय स्वाहा
द्वादशाश्वत्थसमिधो होमयेद्घृतसम्प्लुताः १८
विष्णो रराटमन्त्रेण ततो द्वादश चाहुतीः
इदं विष्णुरिरावती चरोर्द्वादश आहुतीः १९
हुत्वा चाज्याहुतीस्तद्वत्तद्विप्रासेति होमयेत्
शेषहोमं ततः कृत्वा दद्यात् पूर्णाहुतित्रयम् २०

युञ्जतेत्यनुवाकन्तु जप्त्वा प्राशीत वै चरुम्
प्रणवेन स्वशब्दान्ते कृत्वा पात्रे तु पैप्पले २१
ततो मासाधिपानान्तु विप्रान् द्वादश भोजयेत्
त्रयोदशो गुरुस्तत्र तेभ्यो दद्यात्त्रयोदश २२
कुम्भान् स्वाद्वम्बु संयुक्तान् सच्छत्रोपानहान्वितान्
सवस्त्रहेममाल्याढ्यान् व्रतपूर्त्यै त्रयोदश २३
गावः प्रीतिं समायान्तु प्रचरन्तु प्रहर्षिताः
इति गोपथमुत्सृज्य यूपं तत्र निवेशयेत् २४
दशहस्तं प्रपाऽऽराममठसङ्क्रमणादिषु
गृहे च होममेवन्तु कृत्वा सर्वं यथाविधि २५
पूर्वोक्तेन विधानेन प्रविशेच्च गृहं गृही
अनिवारितमन्नाद्यं सर्वेष्वेतेषु कारयेत् २६
द्विजेभ्यो दक्षिणा देया यथाशक्त्या विचक्षणैः
आरामं कारयेद्यस्तु नन्दने स चिरं वसेत् २७
मठप्रदानात् स्वर्लोके शक्रलोके वसेत्ततः
प्रपादानाद्वारुणेन सङ्क्रमेण वसेद्दिवि २८
इष्टकासेतुकारी च गोलके मार्गकृद्गवाम्
नियमव्रतकृद्विष्णुः कृच्छ्रकृत्सर्वपापहा २९

गृहं दत्त्वा वसेत्स्वर्गे यावदाभूतसम्प्लवम्
समुदायप्रतिष्ठेष्टा शिवादीनां गृहात्मनाम् ३०
इत्यादिमहापुराणे आग्नेये समुदायप्रतिष्ठाकथनं नाम
षट्षष्टितमोऽध्यायः

अथ सप्तषष्टितमोऽध्यायः

जीर्णोद्धारविधानम्

भगवानुवाच

जीर्णोद्धारविधिं वक्ष्ये भूषितां स्नपयेद्गुरुः
अचलां विन्यसेद्गेहे अतिजीर्णां परित्यजेत् १
व्यङ्गां भग्नां च शैलाढ्यां न्यसेदन्यां च पूर्ववत्
संहारविधिना तत्र तत्त्वान् संहृत्य देशिकः २
सहस्त्रं नारसिंहेन हुत्वा तामुद्धरेद् गुरुः
दारवीं दारयेद्वह्नौ शैलजां प्रक्षिपेज्जले ३
धातुजां रत्नजां वापि अगाधे वा जलेऽम्बुधौ
यानमारोप्य जीर्णाङ्गं छाद्य वस्त्रादिना नयेत् ४
वादित्रैः प्रक्षिपेत्तोये गुरवे दक्षिणां ददेत्
यत्प्रमाणा च यद्द्रव्या तन्मानां स्थापयेद्दिने
कूपवापीतडागादेर्जीर्णोद्धारे महाफलम् ५

इत्यादिमहापुराणे आग्नेये जीर्णोद्धारकथनं नाम सप्तषष्टितमोऽध्यायः

आग्नेये महापुराणे

अथ द्विनवतितमोऽध्यायः

प्रतिष्ठाविधिकथनम्

ईश्वर उवाच

प्रतिष्ठां सम्प्रवक्ष्यामि क्रमात् सङ्क्षेपतो गुह
पीठं शक्तिं शिवो लिङ्गं तद्योगः सा शिवाणुभिः १
प्रतिष्ठायाः पञ्च भेदास्तेषां रूपं वदामि ते
यत्र ब्रह्मशिलायोगः सा प्रतिष्ठा विशेषतः २
स्थापनन्तु यथायोगं पीठ एव निवेशनम्
प्रतिष्ठाभिन्नपीठस्य स्थितस्थापनमुच्यते ३
उत्थापनञ्च सा प्रोक्ता लिङ्गोद्धारपुरःसरा
यस्यां तु लिङ्गमारोप्य संस्कारः क्रियते बुधैः ४
आस्थापनं तदुद्दिष्टं द्विधा विष्णवादिकस्य च
आसु सर्वासु चैतन्यं नियुञ्जीत परं शिवम् ५
यदाधारादिभेदेन प्रासादेष्वपि पञ्चधा
परीक्षामथ मेदिन्याः कुर्यात्प्रासादकाम्यया ६
शुक्लाज्यगन्धा रक्ता च रक्तगन्धा सुगन्धिनी
पीता कृष्णा सुरागन्धा विप्रादीनां मही क्रमात् ७

पूर्वेशोत्तरसर्वत्र पूर्वा चैषां विशिष्यते
आखाते हास्तिके यस्याः पूर्णे मृदधिका भवेत् ८
उत्तमान्तां महीं विद्यात्तोयाद्यैर्वा समुक्षिताम्
अस्थ्यङ्गारादिभिर्दुष्टामत्यन्तं शोधयेद् गुरुः ९
नगरग्रामदुर्गार्थं गृहप्रासादकारणम्
खनकैर्गोकुलावासैः कर्षणैर्वा मुहुर्मुहुः १०
मण्डपे द्वारपूजादि मन्त्रतृप्त्यवसानकं
कर्म निर्वर्त्याघोरास्त्रं सहस्त्रं विधिना यजेत् ११
समीकृत्योपलिप्तायां भूमौ संशोधयेद्दिशः
स्वर्णादध्यक्षतै रेखाः प्रकुर्वीत प्रदक्षिणम् १२
मध्यादीशानकोष्ठस्थे पूर्णकुम्भे शिवं यजेत्
वास्तुमभ्यर्च्य तत्तोयैः सिञ्चेत् कुद्दालकादिकम् १३
बाह्ये रक्षोगणानिष्ट्वा विधिना दिग्बलिं क्षिपेत्
भूमिं संसिच्य संस्नाप्य कुद्दालाद्यं प्रपूजयेत् १४
अन्यं वस्त्रयुगच्छन्नं कुम्भं स्कन्धे द्विजन्मनः
निधाय गीतवाद्यादिब्रह्मघोषसमाकुलम् १५

पूजां कुम्भे समाहृत्य प्राप्ते लग्नेऽग्निकोष्ठके
कुद्दालेनाभिषिक्तेन मध्वक्तेन तु खानयेत् १६
नैर्ऋत्यां क्षेपयेन्मृत्स्नां खाते कुम्भजलं क्षिपेत्
पुरस्य पूर्वसीमान्तं नयेद् यावदभीप्सितम् १७
अथ तत्र क्षणं स्थित्वा भ्रामयेत् परितः पुरम्
सिञ्चन् सीमान्तचिह्नानि यावदीशानगोचरम् १८
अर्घ्यदानमिदं प्रोक्तं तत्र कुम्भपरिभ्रमात्
इत्थं परिग्रहं भूमेः कुर्वीत तदनन्तरम् १९
कर्करान्तं जलान्तं वा शल्यदोषजिघांसया
खानयेद् भूः कुमारीं चेद् विधिना शल्यमुद्धरेत् २०
अकचटतपयशहान् मानवश्चेत् प्रश्नाक्षराणि तु
अग्नेर्ध्वजादिपतिताः स्वस्थाने शल्यमाख्यान्ति २१
कर्तुश्चाङ्गविकारेण जानीयात्तत्प्रमाणतः
पश्वादीनां प्रवेशेन कीर्तनैर्विरुतैर्दिशः २२
मातृकामष्टवर्गाढ्यां फलके भुवि वा लिखेत्
शल्यज्ञानं वर्गवशात् पूर्वादीशान्ततः क्रमात् २३
अवर्गे चैव लोहन्तु कवर्गेऽङ्गारमग्नितः
चवर्गे भस्म दक्षे स्याद् टवर्गेऽस्थि च नैर्ऋते २४

तवर्गे चेष्टका चाप्ये कपालञ्च पवर्गके
यवर्गे शवकीटादि शवर्गे लोहमादिशेत् २५
हवर्गे रजतं तद्वदवर्गांश्चानर्थकरानपि
प्रीत्त्यात्मभिः करापूरैरष्टाङ्गुलमृदन्तरैः २६
पादोनं खातमापूर्य सजलैर्मुद्गराहतैः
लिप्तां समप्लवां तत्र कारयित्वा भुवं गुरुः २७
सामान्यार्घ्यकरो यायान्मण्डपं वक्ष्यमाणकम्
तोरणद्वाःपतीनिष्ट्वा प्रत्यग्द्वारेण संविशेत् २८
कुर्यात्तत्रात्मशुद्ध्यादि कुण्डमण्डपसंस्कृतिम्
कलसं वर्धनीसक्तं लोकपालशिवार्चनम् २९
अग्नेर्जननपूजादि सर्वं पूर्ववदाचरेत्
यजमानान्वितो यायाच्छिलानां स्नानमण्डपम् ३०
शिलाः प्रासादलिङ्गस्य पादधर्मादिसञ्ज्ञकाः
अष्टाङ्गुलोच्छ्रिताः शस्ताश्चतुरस्राः करायताः ३१
पाषाणानां शिलाः कार्या इष्टकानां तदर्धतः
प्रासादेऽश्मशिलाः शैले इष्टका इष्टकामये ३२
अङ्किता नववक्त्राद्यैः पङ्कजाः पङ्कजाङ्किताः
नन्दा भद्रा जया रिक्ता पूर्णाख्या पञ्चमी मता ३३

आसां पद्मो महापद्मः शङ्खोऽथ मकरस्तथा
समुद्रश्चेति पञ्चामी निधिकुम्भाः क्रमादधः ३४
नन्दा भद्रा जया पूर्णा अजिता चापराजिता
विजया मङ्गलाख्या च धरणी नवमी शिला ३५
सुभद्रश्च विभद्रश्च सुनन्दः पुष्पनन्दकः
जयोऽथ विजयश्चैव कुम्भः पूर्णस्तथोत्तरः ३६
नवानान्तु यथासङ्ख्यं निधिकुम्भा अमी नव
आसनं प्रथमं दत्त्वा ताड्योल्लिख्य शराणुना ३७
सर्वासामविशेषेण तनुत्रेणावगुण्ठनम्
मृद्भिर्गोमयगोमूत्रकषायैर्गन्धवारिणा ३८
अस्त्रेण हूं फडन्तेन मलस्नानं समाचरेत्
विधिना पञ्चगव्येन स्नानं पञ्चामृतेन च ३९
गन्धतोयान्तरं कुर्यान्निजनामाङ्कितागुना
फलरत्नसुवर्णानां गोशृङ्गसलिलैस्ततः ४०
चन्दनेन समालभ्य वस्त्रैराच्छादयेच्छिलाम्
स्वर्णोत्थमासनं दत्त्वा नीत्वा यागं प्रदक्षिणम् ४१
शय्यायां कुशतल्पे वा हृदयेन निवेशयेत्
सम्पूज्य न्यस्य बुद्ध्यादिधरान्तं तत्त्वसञ्चयम् ४२

त्रिखण्डव्यापकं तत्त्वत्रयञ्चानुक्रमान् न्यसेत्
बुद्ध्यादौ चित्तपर्यन्ते चिन्तातन्मात्रकावधौ ४३
तन्मात्रादौ धरान्ते च शिवविद्यात्मनां स्थितिः
तत्त्वानि निजमन्त्रेण तत्त्वेशांश्च हृदार्चयेत् ४४
स्थानेषु पुष्पमालादिचिह्नितेषु यथाक्रमम्
ॐ हूं शिवतत्त्वाय नमः । ॐ हूं शिवतत्त्वाधिपतये रुद्राय नमः ।
ॐ हां विद्यातत्त्वाय नमः । ॐ हां विद्यातत्त्वाधिपाय विष्णवे
नमः । ॐ हां आत्मतत्त्वाय नमः । ॐ हां आत्मतत्त्वाधिपतये
ब्रह्मणे नमः
क्ष्माग्नियजमानार्कान् जलवातेन्दुखानि च ४५
प्रतितत्त्वं न्यसेदष्टौ मूर्तीः प्रतिशिलां शिलाम्
सर्वं पशुपतिं चोग्रं रुद्रं भवमथेश्वरम् ४६
महादेवं च भीमं च मूर्तीशांश्च यथाक्रमात्
ॐ धरामूर्तये नमः ॐ धराधिपतये नमः
इत्यादिमन्त्रान् लोकपालान् यथासङ्ख्यं निजाणुभिः ४७
विन्यस्य पूजयेत् कुम्भांस्तन्मन्त्रैर्वा निजाणुभिः
इन्द्रादीनां तु वीजानि वक्ष्यमाणक्रमेण तु ४८
लूं रूं शूं पूं वूं यूं मूं हूं क्षूमिति
उक्तो नवशिलापक्षः शिला पञ्चपदा तथा
प्रतितत्त्वं न्यसेन्मूर्तीः सृष्ट्या पञ्च धरादिकाः ४९

ब्रह्मा विष्णुस्तथा रुद्र ईश्वरश्च सदाशिवः
एते च पञ्च मूर्तीशा यष्टव्यास्तासु पूर्ववत् ५०
ॐ पृथ्वीमूर्तये नमः । ॐ पृथ्वीमूर्त्यधिपतये ब्रह्मणे नमः
मन्त्राः
सम्पूज्य कलशान् पञ्च क्रमेण निजनामभिः
निरुन्धीत विधानेन न्यासो मध्यशिलाक्रमात् ५१
कुर्यात् प्राकारमन्त्रेण भूतिदर्भैस्तिलैस्ततः
कुण्डेषु धारिकां शक्तिं विन्यस्याभ्यर्च्य तर्पयेत् ५२
तत्त्वतत्त्वाधिपान् मूर्तीर्मूर्तीशांश्च घृतादिभिः
ततो ब्रह्मांशशुद्ध्यर्थं मूलाङ्गं ब्रह्मभिः क्रमात् ५३
कृत्वा शतादिपूर्णान्तं प्रोक्ष्याः शान्तिजलैः शिलाः
पूजयेच्च कुशैः स्पृष्ट्वा प्रतितत्त्वमनुक्रमात् ५४
सांनिध्यमथ सन्धानं कृत्वा शुद्धं पुनर्न्यसेत्
एवं भागत्रये कर्म गत्वा गत्वा समाचरेत् ५५
ॐ आं ईं आत्मतत्त्वविद्यातत्त्वाभ्यां नमः इति
संस्पृशेद् दर्भमूलाद्यैर्ब्रह्माङ्गादित्रयं क्रमात्
कुर्यात्तत्त्वानुसन्धानं ह्रस्वदीर्घप्रयोगतः ५६
ॐ हां उं विद्यातत्त्वशिवतत्त्वाभ्यां नमः
घृतेन मधुना पूर्णांस्ताम्रकुम्भान् सरत्नकान्
पञ्चगव्यार्घ्यसंसिक्तान् लोकपालाधिदैवतान् ५७

पूजयित्वा निजैर्मन्त्रैः सन्निधौ होममाचरेत्
शिलानामथ सर्वासां संस्मरेदधिदेवताः ५८
विद्यारूपाः कृतस्नाना हेमवर्णाः शिलाम्बराः
न्यूनादिदोषमोषार्थं वास्तुभूमेश्च शुद्धये
यजेदस्त्रेण मूर्धान्तमाहुतीनां शतं शतम् ५९
इत्यादिमहापुराणे आग्नेये शिलान्यासकथनं नाम
द्विनवतितमोऽध्यायः

अथ त्रिनवतितमोऽध्यायः
वास्तुपूजादिविधानम्

ईश्वर उवाच
ततः प्रासादमासूत्र्य वर्तयेद्वास्तुमण्डपम्
कुर्यात् कोष्ठचतुःषष्टिं क्षेत्रे वेदास्रके समे १
कोणेषु विन्यसेद् वंशौ रज्जवोऽष्टौ विकोणगाः
द्विपदाः षट्पदास्तास्तु वास्तुन्तत्रार्चयेद् यथा २
आकुञ्चितकचं वास्तुमुत्तानमसुराकृतिम्
स्मरेत् पूजासु कुड्यादिनिवेशे उत्तराननम् ३

जानुनी कूर्परौ शक्थि दिशि वातहुताशयोः
पैत्र्यां पादपुटे रौद्र्यां शिरोऽस्य हृदयेऽञ्जलिः ४
अस्य देहे समारूढा देवताः पूजिताः शुभाः
अष्टौ कोणाधिपास्तत्र कोणार्धेष्वष्टसु स्थिताः ५
षट्पदास्तु मरीच्याद्या दिक्षु पूर्वादिषु क्रमात्
मध्ये चतुष्पदो ब्रह्मा शेषास्तु पदिकाः स्मृताः ६
समस्तनाडीसंयोगे महामर्मानुजं फलम्
त्रिशूलं स्वस्तिकं वज्रं महास्वस्तिकसम्पुटौ ७
त्रिकुटं मणिबन्धं च सुविशुद्धं पदं तथा
इति द्वादश मर्माणि वास्तोर्भित्त्यादिषु त्यजेत् ८
साज्यमक्षतमीशाय पर्जन्यायाम्बुजोदकम्
ददीताथ जयन्ताय पताकां कुङ्कुमोज्ज्वलाम् ९
रत्नवारि महेन्द्राय रवौ धूम्रं वितानकम्
सत्याय घृतगोधूममाज्यभक्तं भृशाय च १०
विमांसमन्तरीक्षाय शक्तुन्तेभ्यस्तु पूर्वतः
मधुक्षीराज्यसम्पूर्णां प्रदद्याद्वह्नये स्रुचम् ११
लाजान् पूष्णे सुवर्णाम्बु वितथाय निवेदयेत्
दद्याद् गृहक्षते क्षौद्रं यमराजे पलौदनम् १२

गन्धं गन्धर्वनाथाय जिह्वां भृङ्गाय पक्षिणः
मृगाय पद्मपर्णानि याम्यामित्यष्टदेवताः १३
पित्रे तिलोदकं क्षीरं वृक्षजं दन्तधावनम्
दौवारिकाय देवाय प्रदद्याद् धेनुमुद्रया १४
सुग्रीवाय दिशेत् पूपान् पुष्पदन्ताय दर्भकम्
रक्तं प्रचेतसे पद्ममसुराय सुरासवम् १५
घृतं गुडौदनं शेषे रोगाय घृतमण्डकान्
लाजान् वा पश्चिमाशायां देवाष्टकमितीरितम् १६
मारुताय ध्वजं पीतं नागाय नागकेशरम्
मुख्ये भक्ष्याणि भल्लाटे मुद्गसूपं सुसंस्कृतम् १७
सोमाय पायसं साज्यं शालूकमृषये दिशेत्
लोपीमदितये दित्यै पुरीमित्युत्तराष्टकम् १८
मोदकान् ब्रह्मणः प्राच्यां षट्पदाय मरीचये
सवित्रे रक्तपुष्पाणि वह्न्यधः कोणकोष्ठके १९
तदधःकोष्ठके दद्यात् सावित्र्यै च कुशोदकं
दक्षिणे चन्दनं रक्तं षट्पदाय विवस्वते २०
हरिद्रौदनमिन्द्राय रक्षोधःक्रोणकोष्ठके
इन्द्रजयाय मिश्रान्नमिन्द्राधस्तान्निवेदयेत् २१

वारुरायां षट्पदासीने मित्रे सगुडमोदनम्
रुद्राय घृतसिद्धान्नं वायुकोणाधरे पदे २२
तदधो रुद्रदासाय मासं मार्गमथोत्तरे
ददीत माषनैवेद्यं षट्पदस्थे धराधरे २३
आपाय शिवकोणाधः तद्वत्साय च तत्स्थले
क्रमाद्दद्याद्दधिक्षीरं पूजयित्वा विधानतः २४
चतुष्पदे निविष्टाय ब्रह्मणे मध्मदेशतः
पञ्चगव्याक्षतोपेतञ्चरुं साज्यं निवेदयेत् २५
ईशादिवायुपर्यन्तकोणेष्वथ यथाक्रमम्
वास्तुवाह्ये चरक्याद्याश्चतस्त्रः पूजयेद् यथा २६
चरक्यै सघृतं मांसं विदार्यै दधिपङ्कजे
पूतनायै पलं पित्तं रुधिरं च निवेदयेत् २७
अस्थीनि पापराक्षस्यै रक्तपित्तपलानि च
ततो माषौदनं प्राच्यां स्कन्दाय विनिवेदयेत् २८
अर्यम्णे दक्षिणाशायां पूपान् कृसरया युतान्
जम्भकाय च वारुरयामामिषं रुधिरान्वितम् २९
उदीच्यां पिलिपिञ्जाय रक्तान्नं कुसुमानि च
यजेद्वा सकलं वास्तुं कुशदध्यक्षतैर्जलैः ३०

गृहे च नगरादौ च एकाशीतिपदैर्यजेत्
त्रिपदा रज्जवः कार्याः षट्पदाश्च विकोणके ३१
ईशाद्याः पादिकास्तस्मिन्नागाद्याश्च द्विकोष्ठगाः
षट्पदस्था मरीच्याद्या ब्रह्मा नवपदः स्मृतः ३२
नगरग्रामखेटादौ वास्तुः शतपदोऽपि वा
वंशद्वयं कोणगतं दुर्जयं दुर्धरं सदा ३३
यथा देवालये न्यासस्तथा शतपदे हितः
ग्रहाः स्कन्दादयस्तत्र विज्ञेयाश्चैव षट्पदाः ३४
चरक्याद्या भूतपदा रज्जुवंशादि पूर्ववत्
देशसंस्थापने वास्तु चतुस्त्रिंशच्छतं भवेत् ३५
चतुःषष्टिपदो ब्रह्मा मरीच्याद्याश्च देवताः
चतुःपञ्चाशत्पदिका अापाद्यष्टौ रसाग्निभिः ३६
ईशानाद्या नवपदाः स्कन्दाद्याः शक्तिकाः स्मृताः
चरक्याद्यास्तद्वदेव रज्जुवंशादि पूर्ववत् ३७
ज्ञेयो वंशसहस्रैस्तु वास्तुमण्डलगः पदैः
न्यासो नवगुणस्तत्र कर्तव्यो देशवास्तुवित् ३८
पञ्चचिंशत्पदो वास्तुर्वैतालाख्यश्चितौ स्मृतः
अन्यो नवपदो वास्तुः षोडशाङ्घ्रिस्तथापरः ३९

षडस्त्रत्र्यस्त्रवृत्तादेर्मध्ये स्याच्चतुरस्त्रकम्
खाते वास्तोः समं पृष्ठे न्यासे ब्रह्मशिलात्मके ४०
शावाकस्य निवेशे च मूर्तिसंस्थापने तथा
पायसेन तु नैवेद्यं सर्वेषां वा प्रदापयेत् ४१
उक्तानुक्ते तु वै वास्तुः पञ्चहस्तप्रमाणतः
गृहप्रासादमानेन वास्तुः श्रेष्ठस्तु सर्वदा ४२
इत्यादिमहापुराणे आग्नेये वास्तुपूजाकथनं नाम त्रिनवतितमोऽध्यायः

अथ चतुरधिकनवतितमोऽध्यायः
शिलाविन्यासविधानम्

ईश्वर उवाच
ईशादिषु चरक्याद्याः पूर्ववत् पूजयेद्बहिः
आहुतित्रितयं दद्यात् प्रतिदेवमनुक्रमात् १
दत्त्वा भूतबलिं लग्ने शिलान्यासमनुक्रमात्
मध्यसूत्रे न्यसेच्छक्तिं कुम्भञ्चानन्तमुत्तमम् २
नकारारूढमूलेन कुम्भेऽस्मिन् धारयेच्छिलाम्
कुम्भानष्टौ सुभद्रादीन् दिक्षु पूर्वादिषु क्रमात् ३
लोकपालाणुभिर्न्यस्य श्वभ्रेषु न्यस्तशक्तिषु
शिलास्तेष्वथ नन्दाद्याः क्रमेण विनिवेशयेत् ४

शम्बैरैर्मूर्तिनाथानां यथा स्युर्भित्तिमध्यतः
तासु धर्मादिकानष्टौ कोणात् कोणं विभागशः ५
सुभद्रादिषु नन्दाद्याश्चतस्रोऽग्नयादिकोणगाः
अजिताद्याश्च पूर्वादिजयादिष्वथ विन्यसेत् ६
ब्रह्माणं चोपरि नस्य व्यापकं च महेश्वरम्
चिन्तयेदेषु चाधानं व्योमप्रासादमध्यगम् ७
बलिन्दत्त्वा जपेदस्त्रं विघ्नदोषनिवारणम्
शिलापञ्चकपक्षेऽपि मनागुद्दिश्यते यथा ८
मध्ये पूर्णशिलान्यासः सुभद्रकलशेऽर्धतः
पद्मादिषु च नन्दाद्याः कोणेष्वग्नयादिषु क्रमात् ९
मध्यभावे चतस्रोऽपि मातृवद्भावसम्मताः
ॐ पूर्णे त्वं महाविश्वे सर्वसन्दोहलक्षणे १०
सर्वसम्पूर्णमेवात्र कुरुष्वाङ्गिरसः सुते
ॐ नन्दे त्वं नन्दिनी पुंसां त्वामत्र स्थापयाम्यहम् ११
प्रासादे तिष्ठ सन्तृप्ता यावच्चन्द्रार्कतारकम्
आयुः कामं श्रियन्नन्दे देहि वासिष्ठि देहिनाम् १२
अस्मिन् रक्षा सदा कार्या प्रासादे यत्नतस्त्वया
ॐ भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि १३

आयुर्दा कामदा देवि श्रीप्रदा च सदा भव
ॐ जयेऽत्र सर्वदा देवि श्रीदाऽऽयुर्दा सदा भव १४
ॐ जयेऽत्र सर्वदा देवि तिष्ठ त्वं स्थापिता मय
नित्यञ्जयाय भूत्यै च स्वामिनी भव भार्गवि १५
ॐ रिक्तेऽतिरिक्तदोषघ्ने सिद्धिमुक्तिप्रदे शुभे
सर्वदा सर्वदेशस्थे तिष्ठास्मिन् विश्वरूपिणि १६
गगनायतनन्ध्यात्वा तत्र तत्त्वत्रयं न्यसेत्
प्रायश्चित्तन्ततो हुत्वा विधिना विसृजेन्मखम् १७
इत्यादिमहापुराणे आग्नेये शिलान्यासकथनं नाम
चतुरधिकनवतितमोऽध्यायः

अथ पञ्चनवतितमोऽध्यायः
प्रतिष्ठासामग्रीविधानम्

ईश्वर उवाच
वक्ष्ये लिङ्गप्रतिष्ठां च प्रासादे भुक्तिमुक्तिदाम्
ताश्चरेत् सर्वदा मुक्तौ भुक्तौ देवदिने सति १
विना चैत्रेण माघादौ प्रतिष्ठा मासपञ्चके
गुरुशुक्रोदये कार्या प्रथमे करणत्रये २

शुक्लपक्षे विशेषेण कृष्णे वा पञ्चमन्दिनम्
चतुर्थीं नवमीं षष्ठीं वर्जयित्वा चतुर्दशीम् ३
शोभनास्तिथयः शेषाः क्रूरवारविवर्जिताः
शतभिषा धनिष्ठार्द्रा अनुरोधोत्तरत्रयम् ४
रोहिणी श्रवणश्चेति स्थिरारम्भे महोदयाः
लग्नञ्च कुम्भसिंहालितुलास्त्रीवृषधन्विनाम् ५
शस्तो जीवो नवर्क्षेषु सप्तस्थानेषु सर्वदा
बुधः षडष्टदिक्सप्ततुर्येषु विनर्तुं शितः ६
सप्तर्तुत्रिदशादिस्थः शशाङ्कोबलदः सदा
रविर्दशत्रिषट्संस्थो राहुस्त्रिदशषड्गतः ७
षट्त्रिस्थानगताः शस्ता मन्दाङ्गारार्ककेतवः
शुभ्राः क्रूराश्च पापाश्च सर्व एकादशस्थिताः ८
एषां दृष्टिर्मुनौ पूर्णा त्वाधिकी ग्रहभूतयोः
पादिकी रामदिक्स्थाने चतुरष्टौ पादवर्जिता ९
पादान्यूनचतुर्नाडी भोगः स्यान्मीनमेषयोः
वृषकुम्भौ च भुञ्जाते चतस्त्रः पादवर्जिताः १०
मकरो मिथुनं पञ्च चापालिहरिकर्कटाः
पादोनाः षट् तुलाकन्ये घटिकाः सार्धपञ्च च ११

केशरी वृषभः कुम्भः स्थिराः स्युः सिद्धिदायकाः
चरा धनुस्तुलामेषा द्विःस्वभावास्तृतीयकाः १२
शुभः शुभग्रहैर्दृष्टः शस्तो लग्नः शुभाश्रितः
गुरुशुक्रबुधैर्युक्तो लग्नो दद्याद्बलायुषी १३
राज्यं शौर्यं बलं पुत्रान् यशोधर्मादिकं बहु
प्रथमः सप्तमस्तुर्यो दशमः केन्द्र उच्यते १४
गुरुशुक्रबुधास्तत्र सर्वसिद्धिप्रसादकाः
त्र्येकादशचतुर्थस्था लग्नात् पापग्रहाः शुभाः १५
अतोऽप्यनीचकर्माथं योज्यास्तिथ्यादयो बुधैः
धाम्नः पञ्चगुणां भूमिं त्यक्त्वा वा धानसम्मिताम् १६
हस्ताद् द्वादशसोपानात् कुर्यान्मण्डपमग्रतः
चतुरस्रं चतुर्द्वारं स्नानार्थन्तु तदर्धतः १७
एकास्यं चतुरास्यं वा रौद्र्यां प्राच्युत्तरेऽथवा
हास्तिको दशहस्तो वै मण्डपोऽर्ककरोऽथवा १८
द्विहस्तोत्तरया वृद्ध्या शेषं स्यान्मण्डपाष्टकम्
वेदी चतुष्करा मध्ये कोणस्तम्भेन संयुता १९
वेदीपादान्तरं त्यक्त्वा कुण्डानि नव पञ्च वा
एकं वा शिवकाष्ठायां प्राच्यां वा तद्गुरोः परम् २०

मुष्टिमात्रं शतार्धे स्याच्छते चारत्निमात्रकं
हस्तं सहस्रहोमे स्यान्नियुते तु द्विहास्तिकम् २१
लक्षे चतुष्करं कुराडं कोटिहोमेऽष्टहस्तकम्
भगाभमग्नौ खराडेन्दु दक्षे त्र्यस्त्रञ्च नैर्ऋते २२
षडस्त्रं वायवे पद्मं सौम्ये चाष्टास्त्रकं शिवे
तिर्यक्पातशिवं खातमूर्ध्वं मेखलया सह २३
तद्बहिर्मेखलास्तिस्त्रो वेदवह्नियमाङ्गुलैः
अङ्गुलैः षड्भिरेका वा कुराडाकारास्तु मेखलाः २४
तासामुपरि योनिः स्यान्मध्येऽश्वत्थदलाकृतिः
उच्छ्रायेणाङ्गुलं तस्माद्विस्तारेणाङ्गुलाष्टकम् २५
दैर्घ्यं कुराडार्धमानेन कुराडकराठसमोऽधरः
पूर्वाग्नियाम्यकुराडानां योनिः स्यादुत्तरानना २६
पूर्वानना तु शेषाणामैशान्येऽन्यतरा तयोः
कुराडानां यश्चतुर्विंशो भागः सोऽङ्गुल इत्यतः २७
प्लक्षोदुम्बरकाश्वत्थवटजास्तोरणाः क्रमात्
शान्तिभूतिबलारोग्यपूर्वाद्या नामतः क्रमात् २८
पञ्चषट्सप्तहस्तानि हस्तखातस्थितानि च
तदर्धविस्तराणि स्युर्युतान्याम्रदलादिभिः २९

इन्द्रायुधोपमा रक्ता कृष्णा धूम्रा शशिप्रभा
शुक्लाभा हेमवर्णा च पताका स्फाटिकोपमा ३०
पूर्वादितोऽब्जजे रक्ता नीलानन्तस्य नैर्ऋते
पञ्चहस्तास्तदर्धाश्च ध्वजा दीर्घाश्च विस्तराः ३१
हस्तप्रदेशिता दण्डा ध्वजानां पञ्चहस्तकाः
वल्मीकाद्दन्तिदन्ताग्रात्तथा वृषभशृङ्गतः ३२
पद्मषण्डाद्वराहाच्च गोष्ठादपि चतुष्पथात्
मृत्तिका द्वादश ग्राह्या वैकुण्ठेऽष्टौ पिनाकिनि ३३
न्यग्रोधोदुम्बराश्वत्थचूतजम्बुत्वगुद्भवम्
कषायपञ्चकं ग्राह्यमार्तवञ्च फलाष्टकम् ३४
तीर्थाम्भांसि सुगन्धीनि तथा सर्वौषधीजलम्
शस्तं पुष्पफलं वक्ष्ये रत्नगोशृङ्गवारि च ३५
स्नानायापाहरेत् पञ्च पञ्चगव्यामृतं तथा
पिष्टनिर्मितवस्त्रादिद्रव्यं निर्मञ्जनाय च ३६
सहस्रशुषिरं कुम्भं मण्डलाय च रोचना
शतमोषधिमूलानां विजया लक्ष्मणा बला ३७
गुडूच्यतिबला पाठा सहदेवा शतावरी
ऋद्धिः सुवर्चसा वृद्धिः स्नाने प्रोक्ता पृथक् पृथक् ३८

रक्षायै तिलदर्भौघो भस्मस्नानन्तु केवलम्
यवगोधूमविल्वानां चूर्णानि च विचक्षणः ३९
विलेपनं सकर्पूरं स्नानार्थं कुम्भगण्डकान्
खट्वाञ्च तूलिकायुग्मं सोपधानं सवस्त्रकम् ४०
कुर्याद्वित्तानुसारेण शयने लक्ष्यकल्पने
घृतक्षौद्रयुतं पात्रं कुर्यात् स्वर्णशलाकिकाम् ४१
वर्धनीं शिवकुम्भञ्च लोकपालघटानपि
एकं निद्राकृते कुम्भं शान्त्यर्थं कुण्डसङ्ख्यया ४२
द्वारपालादिधर्मादिप्रशान्तादिघटानपि
वास्तुलक्ष्मीगणेशानां कलशानपरानपि ४३
धान्यपुञ्जकृताधारान् सवस्त्रान् स्रग्विभूषितान्
सहिरण्यान् समालब्धान् गन्धपानीयपूरितान् ४४
पूर्णपात्रफलाधारान् पल्लवाद्यान् सलक्षणान्
वस्त्रैराच्छादयेत् कुम्भानाहरेद्गौरसर्षपान् ४५
विकिरार्थन्तथा लाजान् ज्ञानखड्गञ्च पूर्ववत्
सापिधानां चरुस्थालीं दर्वीं च ताम्रनिर्मिताम् ४६
घृतक्षौद्रान्वितं पात्रं पादाभ्यङ्गकृते तथा
विष्टरांस्त्रिशतादर्भदलैर्बाहुप्रमाणकान् ४७

चतुरश्चतुरस्तद्वत् पालाशान् परिधीनपि
तिलपात्रं हविःपात्रमर्घपात्रं पवित्रकम् ४८
फलविंशाष्टमानानि घटो धूपप्रदानकम्
श्रुक्श्रुवौ पिटकं पीठं व्यजनं शुष्कमिन्धनम् ४९
पुष्पं पत्रं गुग्गुलञ्च घृतैर्दीपांश्च धूपकम्
अक्षतानि त्रिसूत्रीञ्च गव्यमाज्यं यवांस्तिलान् ५०
कुशाः शान्त्यै त्रिमधुरं समिधो दशपर्विकाः
बाहुमात्रश्रुवं हस्तमर्कादिग्रहशान्तये ५१
समिधोऽर्कपलाशोत्थाः खादिरामार्गपिप्पलाः
उदुम्वरशमीदूर्वाकुशोत्थाः शतमष्ट च ५२
तदभावे यवतिला गृहोपकरणं तथा
स्थालीदर्वीपिधानादि देवादिभ्योऽशुकद्वयम् ५३
मुद्रामुकुटवासांसि हारकुण्डलकङ्कणान्
कुर्यादाचार्यपूजार्थं वित्तशाठ्यं विवर्जयेत् ५४
तत्पादपादहीना च मूर्तिभृदस्त्रजापिनाम्
पूजा स्याज्जापिभिस्तुल्या विप्रदैवज्ञशिल्पिनाम् ५५
वज्रार्कशान्तौ नीलातिनीलमुक्ताफलानि च
पुष्पपद्मादिरागञ्च वैदूर्यं रत्नमष्टमम् ५६

उषीरमाधवक्रान्तारक्तचन्दनकागुरुम्
श्रीखराडं सारिकङ्कुष्ठं शङ्खिनी ह्योषधीगणाः ५७
हेमताम्रमयं रक्तं राजतञ्च सकांस्यकम्
शीसकञ्चेति लोहानि हरितालं मनःशिला ५८
गैरिकं हेममाक्षीकं पारदो वह्निगैरिकम्
गन्धकाभ्रकमित्यष्टौ धातवो व्रीहयस्तथा ५९
गोधूमान् सतिलान्माषान्मुद्गानप्याहरेद्यवान्
नीवारान् श्यामकानेवं व्रीहयोऽप्यष्ट कीर्तिताः ६०
इत्याग्नेये महापुराणे प्रतिष्ठासामग्री नाम पञ्चनवतितमोऽध्यायः

अथ षराणवतितमोऽध्यायः

अधिवासनविधिः

ईश्वर उवाच
स्नात्वा नित्यद्वयं कृत्वा प्रणवार्घकरो गुरुः
सहायैर्मूर्तिपैर्विप्रैः सह गच्छेन्मखालयम् १
शान्त्यादितोरणांस्तत्र पूर्ववत् पूजयेत् क्रमात्
प्रदक्षिणक्रमादेषां शाखायां द्वारपालकान् २
प्राचि नन्दिमहाकालौ याम्ये भृङ्गिविनायकौ
वारुणे वृषभस्कन्दौ देवीचराडौ तथोत्तरे ३

तच्छाखामूलदेशस्थौ प्रशान्तशिशिरौ घटौ
पर्जन्यशोकनामानौ भूतं सञ्जीवनामृतौ ४
धनदश्रीप्रदौ द्वौ द्वौ पूजयेदनुपूर्वशः
स्वनामभिश्चतुर्थ्यन्तैः प्रणवादिनमोऽन्तगैः ५
लोकग्रहवसुद्वाःस्थस्त्रवन्तीनां द्वयं द्वयम्
भानुत्रयं युगं वेदो लक्ष्मीर्गणपतिस्तथा ६
इति देवा मखागारे तिष्ठन्ति प्रतितोरणम्
विघ्नसङ्घापनोदाय क्रतोः संरक्षणाय च ७
वज्रं शक्तिं तथा दण्डं खड्गं पाशं ध्वजं गदाम्
त्रिशूलं चक्रमम्भोजम्पताकास्वर्चयेत् क्रमात् ८
ॐ हूं फट् नमः । ॐ हूं फट् द्वाःस्थशक्तये हूं फट् नमः
इत्यादिमन्त्रैः
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ९
ध्वजाष्टदेवताः पूज्याः पूर्वादौ भूतकोटिभिः
ॐ कौं कुमुदाय नम इत्यादिमन्त्रैस्तथा १०
हेतुकं त्रिपुरघ्नञ्च शक्त्याख्यं यमजिह्वकं
कालं करालिनं षष्ठमेकाङ्घ्रिं भीममष्टकम् ११

तथैव पूजयेद् दिक्षु क्षेत्रपालाननुक्रमात्
बलिभिः कुसुमैर्धूपैः सन्तुष्टान् परिभावयेत् १२
काक्षीतृणेषु वंशेषु स्थूणास्वन्येष्वनुक्रमात्
पञ्च क्षित्यादितत्त्वानि सद्योजातादिभिर्यजेत् १३
सदाशिवपदव्यापि मण्डपं धाम शाङ्करम्
पताकाशक्तिसंयुक्तं तत्त्वदृष्ट्यावलोकयेत् १४
दिव्यान्तरिक्षभूमिष्ठविघ्नानुत्सार्य पूर्ववत्
प्रविशेत् पश्चिमद्वारा शेषद्वाराणि दर्शयेत् १५
प्रदक्षिणक्रमाद्गत्वा निविष्टोवेदिदक्षिणे
उत्तराभिमुखः कुर्याद् भूतशुद्धिं यथा पुरा १६
अन्तर्यागं विशेषार्घ्यं मन्त्रद्रव्यादिशोधनम्
कुर्वीत आत्मनः पूजां पञ्चगव्यादि पूर्ववत् १७
साधारङ्कलसन्तस्मिन् विन्यसेत्तदनन्तरम्
विशेषाच्छिवतत्त्वाय तत्त्वत्रयमनुक्रमात् १८
ललाटस्कन्धपादान्तं शिवविद्यात्मकं परम्
रुद्रनारायणब्रह्मदैवतं निजसञ्ज्ञैः १९

ॐ हं हां मूर्तीस्तदीश्वरांस्तत्र पूर्ववद्विनिवेशयेत्
तद्व्यापकं शिवं साङ्गं शिवहस्तञ्च मूर्धनि २०
ब्रह्मरन्ध्रप्रविष्टेन तेजसा वाह्यमन्तरम्
तमःपटलमाधूय प्रद्योतितदिगन्तरम् २१
आत्मानं मूर्तिपैः सार्धं स्रग्वस्त्रकुसुमादिभिः
भूषयित्वा शिवोऽस्मीति ध्यात्वा बोधासिमुद्धरेत् २२
चतुष्पादान्तसंस्कारैः संस्कुर्यान्मखमण्डपम्
विक्षिप्य विकिरादीनि कुशकूर्चोपसंहरेत् २३
आसनीकृत्य वर्धन्यां वास्त्वादीन् पूर्ववद्यजेत्
शिवकुम्भास्त्रवर्धन्यौ पूजयेच्च स्थिरासने २४
स्वदिक्षु कलशारूढांल्लोकपालाननुक्रमात्
वाहायुधादिसंयुक्तान् पूजयेद्विधिना यथा २५
ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम्
सहस्रनयनं शक्रं वज्रपाणिं विभावयेत् २६
सप्तार्चिषं च विभ्राणमक्षमालां कमण्डलुम्
ज्वालामालाकुलं रक्तं शक्तिहस्तमजासनम् २७
महिषस्थं दण्डहस्तं यमं कालानलं स्मरेत्
रक्तनेत्रं खरारूढं खड्गहस्तञ्च नैर्ऋतम् २८

वरुणं मकरे श्वेतं नागपाशधरं स्मरेत्
वायुं च हरिणे नीलं कुवेरं मेषसंस्थितम् २९
त्रिशूलिनं वृषे चेशं कूर्मेऽनन्तन्तु चक्रिणम्
ब्रह्माणं हंसगं ध्यायेच्चतुर्वक्त्रं चतुर्भुजम् ३०
स्तम्भमूलेषु कुम्भेषु वेद्यां धर्मादिकान् यजेत्
दिक्षु कुम्भेष्वनन्तादीन् पूजयन्त्यपि केचन ३१
शिवाज्ञां श्रावयेत् कुम्भं भ्रामयेदात्मपृष्ठगम्
पूर्ववत् स्थापयेदादौ कुम्भं तदनु वर्धनीम् ३२
शिवं स्थिरासनं कुम्भे शस्त्रार्थञ्च ध्रुवासनम्
पूजयित्वा यथापूर्वं स्पृशेदुद्भवमुद्रया ३३
निजयागं जगन्नाथ रक्ष भक्तानुकम्पया
एभिः संश्राव्य रक्षार्थं कुम्भे खड्गं निवेशयेत् ३४
दीक्षास्थापनयोः कुम्भे स्थण्डिले मण्डलेऽथवा
मण्डलेऽभ्यर्च्य देवेशं व्रजेद्वै कुण्डसन्निधौ ३५
कुण्डनाभिं पुरस्कृत्य निविष्टा मूर्तिधारिणः
गुरोरादेशतः कुर्युर्निजकुण्डेषु संस्कृतिम् ३६
जपेयुर्जापिनः सङ्ख्यं मन्त्रमन्ये तु संहिताम्
पठेयुर्ब्राह्मणाः शान्तिं स्वशाखावेदपारगाः ३७

श्रीसूक्तं पावमानीश्च मैत्रकञ्च वृषाकपिम्
ऋग्वेदी पूर्वदिग्भागे सर्वमेतत् समुच्चरेत् ३८
देवव्रतन्तु भारुराडं ज्येष्ठसाम रथन्तरम्
पुरुषं गीतिमेतानि सामवेदी तु दक्षिणे ३९
रुद्रं पुरुषसूक्तञ्च श्लोकाध्यायं विशेषतः
ब्राह्मणञ्च यजुर्वेदी पश्चिमायां समुच्चरेत् ४०
नीलरुद्रं तथाथर्वी सूक्ष्मासूक्ष्मन्तथैव च
उत्तरेऽथर्वशीर्षञ्च तत्परस्तु समुद्धरेत् ४१
आचार्यश्चाग्निमुत्पाद्य प्रतिकुराडं प्रदापयेत्
वह्नेः पूर्वादिकान् भागान् पूर्वकुराडादितः क्रमात् ४२
धूपदीपचरूणाञ्च ददीताग्निं समुद्धरेत्
पूर्ववच्छिवमभ्यर्च्य शिवाग्नौ मन्त्रतर्पणम् ४३
देशकालादिसम्पत्तौ दुर्निमित्तप्रशान्तये
होमङ्कृत्वा तु मन्त्रज्ञः पूर्णां दत्त्वा शुभावहाम् ४४
पूर्ववच्चरुकं कृत्वा प्रतिकुराडं निवेदयेत्
यजमानालङ्कृतास्तु व्रजेयुः स्नानमराडपम् ४५
भद्रपीठे निधायेशं ताडयित्वावगुराठयेत्
स्नापयेत् पूजयित्वा तु मृदा काषायवारिणा ४६

गोमूत्रैर्गोमयेनापि वारिणा चान्तरान्तरा
भस्मना गन्धतोयेन फडन्तास्त्रेण वारिणा ४७
देशिको मूर्तिपैः सार्धं कृत्वा कारणशोधनम्
धर्मजप्तेन सञ्छाद्य पीतवर्णेन वाससा ४८
सम्पूज्य सितपुष्पैश्च नयेदुत्तरवेदिकाम्
तत्र दत्तासनायाञ्च शय्यायां सन्निवेश्य च ४९
कुङ्कुमालिप्तसूत्रेण विभज्य गुरुरालिखेत्
शलाकया सुवर्णस्य अक्षिणी शस्त्रकर्मणा ५०
अञ्जयेल्लक्ष्मकृत् पश्चाच्छास्त्रदृष्टेन कर्मणा
कृतकर्मा च शस्त्रेण लक्ष्मी शिल्पी समुत्क्षिपेत् ५१
त्र्यंशादर्धोऽथ पादार्धादर्धाया अर्धयोऽथवा
सर्वकामप्रसिद्ध्यर्थं शुभं लक्ष्मावतारणम् ५२
लिङ्गदीर्घविकारांशे त्रिभक्तं भागवर्णनात्
विस्तारो लक्ष्म देहस्य भवेल्लिङ्गस्य सर्वतः ५३
यवस्य नवभक्तस्य भागैरष्टाभिरावृता
हस्तिके लक्ष्मरेखा च गाम्भीर्याद् विस्तरादपि ५४
एवमष्टांशवृद्ध्या तु लिङ्गे सार्धकरादिके
भवेदष्टयवा पृथ्वी गम्भीरात्र च हास्तिके ५५

एवमष्टांश वृद्धया तु लिङ्गे सार्धकरादिके
भवेदष्टयवा पृथ्वी गम्भीरान्नवहास्तिके ५६
शाम्भवेषु च लिङ्गेषु पादवृद्धेषु सर्वतः
लक्ष्म देहस्य विष्कम्भो भवेद्दै यववर्धनात् ५७
गम्भीरत्वपृथुवाभ्यां रेखापि त्र्यंशवृद्धितः
सर्वेषु च भवेत् सूक्ष्मं लिङ्गमस्तकमस्तकम् ५८
लक्ष्मक्षेत्रेऽष्टधाभक्ते मूर्ध्निभागद्वये शुभे
षड्भागपरिवर्तेन मुक्त्वा भागद्वयन्त्वधः ५९
रेखात्रयेण सम्बद्धं कारयेत् पृष्ठदेशगम्
रत्नजे लक्षणोद्धारो यवौ हेमसमुद्भवे ६०
स्वरूपं लक्षणान्तेषां प्रभा रत्नेषु निर्मला
नयनोन्मीलनं वक्त्रे सान्निध्याय च लक्ष्म तत् ६१
लक्ष्मणोद्धाररेखाञ्च घृतेन मधुना तथा
मृत्युञ्जयेन सम्पूज्य शिल्पिदोषनिवृत्तये ६२
अर्चयेच्च ततो लिङ्गं स्नापयित्वा मृदादिभिः
शिल्पिनन्तोषयित्वा तु दद्याद्गां गुरवे ततः ६३
लिङ्गं धूपादिभिः प्राच्य गायेयुर्भर्तृगास्त्रियः
सव्येन चापसव्येन सूत्रेणाथ कुशेन वा ६४

स्मृत्वा च रोचनं दत्त्वा कुर्यान्निर्मन्थनादिकं
गुडलवणधान्याकदानेन विसृजेच्च ताः ६५
गुरुमूर्तिधरैः सार्धं हृदा वा प्रणवेन वा
मृत्स्नागोमयगोमूत्रभस्मभिः सलिलान्तरम् ६६
स्नापयेत् पञ्चगव्येन पञ्चामृतपुरःसरम्
विरूक्षणं कषायैश्च सर्वौषधिजलेन वा ६७
शुभ्रपुष्पफलस्वर्णरत्नशृङ्गयवोदकैः
तथा धारासहस्रेण दिव्यौषधिजलेन च ६८
तीर्थोदकेन गाङ्गेन चन्दनेन च वारिणा
क्षीरार्णवादिभिः कुम्भैः शिवकुम्भजलेन च ६९
विरूक्षणं विलेपञ्च सुगन्धैश्चन्दनादिभिः
सम्पूज्य ब्रह्मभिः पुष्पैर्वर्मणा रक्तचीवरैः ७०
रक्तरूपेण नीराज्य रक्षातिलकपूर्वकम्
घृतौषधैर्जलदुग्धैश्च कुशाद्यैरर्घ्यसूचितैः ७१
द्रव्यैः स्तुत्यादिभिस्तुष्टमर्चयेत् पुरुषाणुना
समाचम्य हृदा देवं ब्रूयादुत्थीयतां प्रभो ७२
देवं ब्रह्मरथेनैव क्षिप्रं द्रव्याणि तन्नयेत्
मण्डपे पश्चिमद्वारे शय्यायां विनिवेशयेत् ७३

शक्त्यादिशक्तिपर्यन्ते विन्यसेदासने शुभे
पश्चिमे पिरिडकान्तस्य न्यसेद्ब्रह्मशिलान्तदा ७४
शस्त्रमस्त्रशतालब्धनिद्राकुम्भध्रुवासनम्
प्रकल्प्य शिवकोणे च दत्त्वार्घ्यं हृदयेन तु ७५
उत्थाप्योक्तासने लिङ्गं शिरसा पूर्वमस्तकम्
समारोप्य न्यसेत्तस्मिन् सृष्ट्या धर्मादिवन्दनम् ७६
दद्याद्धूपञ्च सम्पूज्य तथा वासांसि वर्मणा
गृहोपकृतिनैवेद्यं हृदा दद्यात् स्वशक्तितः ७७
घृतक्षौद्रयुतं पात्रमभ्यङ्गाय पदान्तिके
देशिकश्च स्थितस्तत्र षट्त्रिंशत्तत्त्वसञ्चयम् ७८
शक्त्यादिभूमिपर्यन्तं स्वतत्त्वाधिपसंयुतम्
विन्यस्य पुष्पमालाभिस्त्रिखराडं परिकल्पयेत् ७९
मायापदेशशक्त्यन्तन्तुर्याशाष्टांशवर्तुलम्
तत्रात्मतत्त्वविद्याख्यं शिवं सृष्टिक्रमेण तु ८०
एकशः प्रतिभागेषु ब्रह्मविष्णुहराधिपान्
विन्यस्य मूर्तिमूर्तीशान् पूर्वादिक्रमतो यथा ८१
क्ष्मावह्निर्यजमानार्कजलवायुनिशाकरान्
आकाशमूर्तिरूपांस्तान् न्यसेत्तदधिनायकान् ८२
सर्वं पशुपतिं चोग्रं रुद्रं भवमखेश्वरम्

महादेवश्च भीमश्च मन्त्रास्तद्वाचका इमे ८३
लवशषचयसाश्च हकारश्च त्रिमात्रिकः
प्रणवो हृदयाणुर्वा मूलमन्त्रोऽथवा क्वचित् ८४
पञ्चकुण्डात्मके यागे मूर्तीः पञ्चाथवा न्यसेत्
पृथिवीजलतेजांसि वायुमाकाशमेव च ८५
क्रमात्तदधिपान् पञ्च ब्रह्माणं धरणीधरम्
रुद्रमीशं सदाख्यञ्च सृष्टिन्यायेन मन्त्रवित् ८६
मुमुक्षोर्वा निवृत्ताद्याः अजाताद्यास्तदीश्वराः
त्रितत्त्वं वाथ सर्वत्र न्यसेद्भुक्त्यात्मकारणम् ८७
शुद्धे चात्मनि विद्येशा अशुद्धे लोकनायकाः
द्रष्टव्या मूर्तिपाश्चैव भोगिनी मन्त्रनायकाः ८८
पञ्चविंशत्तथैवाष्टपञ्चत्रीणि यथाक्रमम्
एषान्तत्त्वं तदीशानामिन्द्रादीनां ततो यथा ८९

ॐ हां शक्तितत्त्वाय नम इत्यादि । ॐ हां शक्तितत्त्वाधिपाय नम इत्यादि । ॐ हां क्ष्मामूर्तये नमः । ॐ हां क्ष्मामूर्त्यधीशाय शिवाय नम इत्यादि । ॐ हां पृथिवीमूर्तये नमः । ॐ हां मूर्त्यधिपाय ब्रह्मणे नम इत्यादि । ॐ हां शिवतत्त्वाधिपाय रुद्राय नम इत्यादि